# tulasIkavacham 2

# તુલસીકવચમ્ ૨

## Document Information

Text title : tulasIkavacham 2

File name : tulasIkavacham2.itx

Category : kavacha, devii, tulasI, devI

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar

Acknowledge-Permission: Mahaperiaval Trust

Latest update : June 12, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# તુલસીકવચમ્ ૨

કવચં તવ વક્ષ્યામિ ભવસઙ્કમનાશનમ્ ।
યસ્ય જાપેન સિદ્ધ્યન્તિ સર્વાર્થા નાતિયત્નતઃ ॥ ૧॥

તુલસી પાતુ મે નિત્યં શિરોવક્ત્રોષ્ઠનાસિકાઃ ।
શ્રોત્રનેત્રલલાટં ચ ભ્રૂકપોલં નિરન્તરમ્ ॥ ૨॥

શ્રીસખી પાતુ મે કણ્ઠં ભુજૌ વક્ષશ્ચ કક્ષકમ્ ।
પૃષ્ઠં ચ પિઠરં સર્વં સ્તનં જાનૂ ચ હૃત્તટમ્ ॥ ૩॥

શુભા પાતૂદરં નાભિં પાર્શ્વં હસ્તાઙ્ગુલિં તથા ।
જાઠરં વહ્નિમખિલં ગુદં જઘનગુહ્યકમ્ ॥ ૪॥

પાપહારિણ્યવતુ મે ઊરૂ સ્ફિઙ્માંસજાનુકમ્ ।
પુણ્યદાઽવતુ મે જઙ્ઘે પાદૌ નારદસેવિતા ॥ ૫॥

યદુક્તં યચ્ચ નોક્તં મે યદ્બાહ્યં યત્તથાન્તરમ્ ।
સર્વાઙ્ગં પાતુ મે દેવી નારાયણમનઃ પ્રિયા ॥ ૬॥

ઇતીદં કવચં દિવ્યં તુલસ્યાઃ સર્વસિદ્ધિકૃત્ ।
ત્રિસન્ધ્યં યો જપેત્તસ્ય શ્રીર્વિદ્યાઽઽયુશ્ચ વર્ધતે ॥ ૭॥

પ્રાચીઃ ષડ્ વિલિખેદ્રેખાઃ ઉદીચીં પઞ્ચ ચૈવ હિ ।
સઙ્ખ્યાનાં વિંશતિસ્તત્ર કોષ્ઠાનાં તુ ભવિષ્યતિ ॥ ૮॥

કોષ્ઠે કોષ્ઠે લિખેત્પાદં મન્ત્રસ્યાસ્ય યથાક્રમમ્ ।
ભૂર્જે રોચનયા વિદ્વાન્ કોષ્ઠં કુઙ્કુમમિશ્રયા ॥ ૯॥

યસ્ય યન્ત્રમિદં મૂર્ધ્નિ ભુજે કણ્ઠેઽથવા ભવેત્ ।
સઙ્ગ્રામે વ્યવહારે ચ ચોરવ્યાઘ્રભયેષુ ચ ॥ ૧૦॥

મારીભયે વર્ષભયે નિર્ઘાત ભયપીડિતે ।
ક્ષયાપસ્મારપીડાસુ સર્પવૃશ્ચિકલૂલ(ત )કે ॥ ૧૧॥

તાપજ્વરેઽથવા શીતે નેત્રરોગે ચ દુઃસહે ।
ન તસ્ય કિઞ્ચિદ્ દુરિતમિહામુત્ર ચ જાયતે ॥ ૧૨॥

વન્ધ્યા યા ધારયેદ્યન્ત્રં અચિરાત્પુત્રિણી ભવેત્ ।
ઇતીદં કવચં પ્રોક્તં વાદે ચ વિજયપ્રદમ્ ॥ ૧૩॥

ગોમયેન મૃદા ચૈવ નિર્માય પ્રતિવાદિનમ્ ।
લમ્બમાનાં તસ્ય જિહ્વાં કૃત્વા ચ નિહયા લિપેત્ ॥ ૧૪॥

વામપાદેન ચાક્રમ્ય તજ્જિહ્વાં કવચં જપેત્ ।
અચિરાત્તસ્ય જિહ્વાયાઃ સ્તમ્ભો ભવતિ સંસદિ ॥ ૧૫॥

વશ્યમાકર્ષણં ચૈવ સ્તમ્ભનોચ્ચાટને તથા ।
દ્વેષણં મારણં ચૈવ મન્ત્રેણાનેન વિન્દતિ ॥ ૧૬॥

વિન્યસ્તકવચો યસ્તુ મન્ત્રરાજેન મન્ત્રિતમ્ ।
ભક્ષયેત્તુ ત્વચં તસ્ય વાક્પતિત્વં ન સંશયઃ ॥ ૧૭॥

કામ્યસિદ્ધિર્મયોક્તા તે મોક્ષસિદ્ધિં નિશામય ।
યો નવૈસ્તુલસીપત્રૈઃ સાલગ્રામશિલાર્ચનમ્ ॥ ૧૮॥

કુર્યાત્પુરુષસૂક્તેન તસ્ય મોક્ષઃ કરે સ્થિતઃ ।
વૃદ્ધપાદ્મતઃ

Encoded and proofread by Shree Devi Kumar

*tulasIkavacham 2*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*